# वैदिकसाहित्ये वास्तुसंगीतकलयोर्विमर्शः

**डॉ. शैलेन्द्रप्रसाद उनियालः**
सहायकाचार्यः वेदविभागः
राष्ट्रियसंस्कृतसंस्थानम्
श्रीरघुनाथकीर्तिपरिसरः,
देवप्रयागः, उत्तराखण्डः

ज्ञानविज्ञानकलाकौशलपरम्परायाः परमप्रमाणभूता वेदा एव शेवधिरस्मद्भारतीयानाम्। उक्तञ्च मनुना 'सर्वज्ञान मयो हि स'[1] 'सर्वं वेदात् प्रसिध्यति'[2] वा। अथ विज्ञायते यद् सामवेदे [3] चतुष्षष्टिकलोपदेशः उत्तरार्चिके प्राप्यते[4] शैवतन्त्रोऽपिकलायाः विस्तृतं वर्णनं प्राप्यते। तत्रापि 64 कलानामुल्लेखोऽस्ति। अमरकोषे[5] च 'कला तु षोडशो भागः' इत्यत्र चन्द्रस्य षोडशकलानां वर्णनं विद्यते। निरुक्ते[6] तु वणिकस्य विद्यारूपेण तथा च कलशस्य निर्वचनेऽपि कलाः तस्मिन् शेरते तथा इति निरूपितम्। पावमानीशोधपत्रिकायान्तत्रकला द्विधा मता डा. दुर्गाप्रसादमिश्रैः 1. उपयोगिन्यः कलाः, 2. ललितकलाश्च। तथा ललितकला अपि उपयोगिन्यो भवन्ति, परञ्च तासु अनूभूतेस्तीव्रताप्रबला भवति। यथा-कारुः, लौहकारः, स्वर्णकारः तन्तुवायः इत्यादिजनानां कृतयः उपयोगी कलासु मन्यन्ते। अथ ललितकलासु च वास्तुकला, मूर्तिकला, चित्राकला, सङ्गीतकला, काव्यकलायाश्च पञ्चानां परिगणना भवति। अस्तु। अस्मिन्छोधपत्रे वैदिकवाङ्मये वास्तुकलासङ्गीतकलयोर्विमर्शः प्रस्तूयते।

वैदिकवाङ्मये वास्तुकलाः - 'वासायाच्छाद्यते यत्र वास्तुस्तत्राभिधीयते' इत्यनया व्युत्पत्त्या वस् निवासे धातुना 'वसेरगारेणिच्च' इत्युणादिना तुनि प्रत्ययेन निष्पद्यते वास्तु शब्दः। श्रीमद्यास्कमुनिविरचिते वैदिककोषे[7] निघण्ट्वाख्ये गयः, कृदरः, गर्तः, हर्म्यम्, अस्तम्, पस्त्यम्, दुरोणे, नीलम्, दुर्याः, स्वसराणि, अमा, दमे, कृत्तिः, योनिः, सद्म, शरणम्, वरुथम्, छर्दिः, छदिः, छाया, शर्म्म, अज्म। इति द्वाविंशतिर्गृहनामानि पठितानि।

ऋग्वेदस्य सप्तमे मण्डले महर्षिवशिष्ठस्य मुखाद्वास्तोः विकसितस्वरूपस्य परिचयो भवति[8] यदहं मृण्मये गृहं नैव गमिष्यामि अतो विज्ञायते यः खलु मृण्मये गृहं न

जिगमिषति स पर्णशालां कथं वसेत् सप्तमे मण्डले एव उक्तं बृहन्तं मानं सहस्रद्वारं जगामा गृहम् ।[9] ऋषिर्वशिष्ठस्य कथनं यद् सहस्रद्वारवन्तं प्रशस्तं गृहं गच्छामः सत्यमस्ति वशिष्ठसदृशः ऋषिर्यस्य कुले सहस्रशः ब्रह्मचारिणः अधीयन्त आसन् तेषां अनूचानानां वासाय तु सहस्रद्वारवतः प्रशस्तभवनस्यावश्यकता तु अनिवार्या आसीत्। तत्र ऋग्वेदे[10] अथर्ववेदे[11] यजुर्वेदे वर्णनं प्राप्यते, यत्र अनेकप्रकोष्ठात्मकभवनान्यासन्, यत्र जनाः निवसन्ति स्म। अथर्वणि भवनस्य सुदाढ्र्याय शिलान्यासं च सुदृढं भवति स्म।[12] तस्मिन्काले [13] द्विपक्षा चतुःपक्षा षट्पक्षाः अष्टपक्षाः दशपक्षादिगृहाणां स्थितिः संलक्ष्यते। गृहनिर्माणे क्रमः एवं भवति स्म-

1. अग्निशाला [14] - यत्रा देवेभ्यः हविर्दानादिना यजनं क्रियते।
2. हविर्धनम् - धान्याद्यन्नसंग्रहः भाण्डारगृहम्।
3. पत्नीसदनम् - स्त्रीणां वासः अन्तःपुरमिति।
4. सदस् - उवेशनशयनाद्यर्थम् पुरुषाणाम्।
5. आवसथः - अतिथिकक्षः।
6. गोष्ठः - गवादिपशूनां निवासस्थलम्
7. आयसीदुर्गाः - सुदृढाः शतभुजि (शतभित्तियुक्तस्य वर्णनं प्राप्यते।) [15]
8. पुरः - बहुविशालो भवति स्म। संरक्षणार्थं यजुर्वेदस्य त्रिंशाध्यायस्य दशमे चैकादशे मन्त्रो सशक्तद्वारपालानां व्यवस्था दृश्यते।

एभिः साक्ष्यैर्ज्ञायते यत्तस्मिन्काले वास्तुकला सुविकसिता सुव्यवस्थिता चासीत्। सङ्गीतकलायाः आदिस्रोतस्सामवेदः 'वेदानां सामवेदोऽस्मि'[16] इति गीतोक्तिर्दृढीयति प्राथम्यम्, सङ्गीते नादब्रह्मेति तमेव साध्यति 'रसो वै सः' [17] इति श्रुतिः, छान्दोग्योपनिषदि 'या ऋक् तत् साम' [18] इत्युक्त्वा प्रदर्शितं यदृचामेव संग्रहः सामवेद इति। 'ऋचि अध्यूढं साम'[19] इति वचनमपि तदेव द्रढयति। एवमत्रोच्येते यदृगाश्रितमेव सामास्ति नान्याश्रितमिति, ऋक्साम्नोर्दम्पत्तित्वमपि वर्ण्यते अथर्ववेदे बृहदारण्यकोपनिषदि [20]च अमो ऽहमस्मि सात्वं सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवीत्वम्। ताविह विवहावहै प्रजां प्रजनयावहै। अर्थादहम् अमसंज्ञकः पतिरूपोऽस्मि, त्वञ्च ऋग्रूपापत्नीति। साम्नोर्निर्वचनमपि तदेव दृश्यते सा च[21] अमश्चेति तत्साम्नः सामत्वम्। सा नाम ऋक् तया सम्बद्धः अमो नाम स्वरः षड्जर्षभादिज्ञानरूपो यत्र वर्तते तत्सामेति। अनेन साम्नो विशेषत्वं तस्य गानरूपत्वात्सूच्यते।

सामातिरिच्य त्रयोSपि वेदा मन्त्रमयाः, न तथा सामवेदः, स तु ऋगश्रितोSपि प्राधान्येन गानमय एव। अतएव 'गीतिषु सामाख्या'[22] महर्षि जैमिनिना सामेति संज्ञा गीतिष्वेव निगदिता। का साम्नो गतिः?[23] स्वर इति होवाच इति छान्दोग्योपनिषदि शालावत्यदाल्भ्य संवादे गदितम्। बृहदारण्यकोपनिषद्यपि[24] तस्य हैतस्य साम्नो यः एवं वेद भवति हास्य स्वं तस्य स्वर एव स्वम्। इति वचनमपि तदेव कथयति यत् साम्नः स्वर एव निजं रूपम्। एतेषां सामस्वराणां मण्डलं नारदो व्याकरोति-सप्त स्वरास्त्रयो ग्रामा मूर्छनास्त्वेक विंशतिः ताना एकोनपञ्चाशत् इत्येतत् स्वरमण्डलम्।

यत् सामस्वरमण्डले सप्तस्वराः त्रयो ग्रामाः, एकविंशतिर्मूर्च्छनाः उफनपञ्चाशच्च तानाः भवन्ति। साम स्वराणां निर्णयो नारदीयशिक्षायां सामविधनब्राह्मणे च एवं संलक्ष्यते[25]-

यः सामगानां प्रथमः स वेणोर्मध्यमः स्वरः।
योद्वितीयः स गान्धारस्तृतीयस्त्वृषभः स्मृतः।।
चतुर्थः षड्ज इत्याहुः पंचमो धैवतो भवेत्।
षष्ठो निषादो विज्ञेयः सप्तमः पंचमः स्मृतः।।

अत्रा धैवत निषादयोः स्थानव्युत्क्रमो लक्ष्यते। एते सामांकानुसारस्वराः अयं क्रमोSत्र तालिकायामवगन्तव्यः

| क्र. सं. | अतिक्रुष्टः पंचमः ।।प।। | (क्रुष्टः) तद्योSसौक्रुष्टतम इव |
|---|---|---|
| <br><br>1.<br>2.<br>3.<br>4.<br>5.<br>6.<br>7. | सामस्वरः वेणोः स्वरः<br><br>प्रथमः मध्यमः ।म।<br>द्वितीयः गान्धरः ।ग।<br>तृतीयः ऋषभः ।रे।<br>चतुर्थः षड्जः ।सा।<br>पंचमः (मन्द्रः) निषादः।नि।<br>षष्ठः (अतिस्वार्यः)धैवतः।ध्।<br>सप्तमः पंचमः ।प। | साम्नः स्वरस्तं देवा उपजीवन्ति ।प।<br>1. योSवरेषां प्रथमस्तं मनुष्याः ।म।<br>2. यो द्वितीयस्तं गन्धर्वाप्सरसः ।ग।<br>3. यस्तृतीयस्तं पशवः (वृषभः, ऋषभः) ।रे।<br>4. यश्चतुर्थस्तं पितरोये चाण्डेषु शेरते ।सा।<br>5. यः पंचमस्तमसुररक्षांसि (निषादः)।नि।<br>(अन्त्यः)<br>योSन्त्यस्तमोध्योवनस्पतयश्चान्यज्जगत्<br>(सामविधानब्राह्मणे) ।ध्। |

पिंगलाचार्येणापि एते स्वराः, षड्जादयः [26] षड्जर्षभगान्धरमध्यपंचम धैवतनिषादाः स्वराः। सामवेदीयसप्तस्वराणां यजुर्वेदीय त्रिषु स्वरेषु (उदात्तानुदात्तस्वरितेषु) कथं समावेशो भवतीति विषये निरूप्यते[27]-' गान्धर्ववेदे ये षड्जादयः सप्तस्वराः प्रोक्तास्ते यजुर्वेदादौ त्रिषूदात्तानुदात्तस्वरितेष्वन्तर्गता भवन्ति। यथोदात्ते स्वरे निषादगान्धारौ ह्यनुदात्ते ऋषभधैवतौ, स्वरिते च षड्जमध्यमपंचमान्तर्भुक्ताः सन्ति। एतत् सामगानस्य स्वरमण्डलमुद्गातृभिः विकार-विश्लेषण-विकर्षणा-भ्यास-विरामस्तोभाख्याः षड्विकारा गीयन्ते। तद्यथा-1 अंकतः 7 अंकपर्यन्तमंगुलीभिः स्वराः दीयन्ते।

1. विकारः - 'अग्ने' इत्यत्र 'ओग्नायि' इति।
2. विश्लेषणम् - 'वीतये' इत्यस्य 'वोयि तोया2चि' इति।
3. विकर्षणम् - 'ये' इत्यस्य 'या23यि' इति।
4. अभ्यासः - पौनःपुण्येनोच्चारणम् यथा-'तोया2चि। तोया2यि इति।
5. विरामो यथा - ''गृणानो हव्यदातये' इत्यस्य गृणानो ह। व्यदातये' इति 'गृणानो ह' इत्यस्य पदान्तत्वाभावेऽपि गानसौकर्यार्थं शब्दमध्य एव विरामादस्य विराम संज्ञा भवति।
6. स्तोभ इति ऋग्विलक्षणो वर्णः यथा 'औ हो वा' हाउ इत्यादि स्तोभः सार्थकनिरर्थकभेदेन द्विधा।

1. सार्थकः - नृमणे, निधीमहि, अग्निष्टपति इत्यादिकः
2. निरर्थकः - 'औहोवा' हाई, हाउ, इत्यादिः।

गानन्तु चतुर्धा भवति-

1. वेयगानम् अथवा ग्रामे गेयगानम्
2. आरण्यगानम्
3. उफह गानम्
4. उफह्यगानं विकृतिगानं वा

1. वेयगानस्यापरनाम ग्रामे गेयगानमस्ति, अर्थाद्गानमिदं कस्मिंश्दपि ग्रामेऽथवा समाजे गेयं भवति।

2. किंचारण्यगानान्तर्गतं गानम् अरण्ये एव गेयं भवति सामवेदीनां मान्यतास्ति यदारण्यगानस्य स्तोममीदृग् भवति विलक्षणं विचित्रां तथा ग्रामगानादनर्थस्य सम्भावना भवति।

3. उफह शब्दस्यार्थो 'उफहनम्' भवति कस्मिँश्चिदपि विशेषावसरे मन्त्राणां सामयिकपरिवर्तनम्। अनया व्याख्यया 'उफह गानम्' सोमयागस्यावसरे प्रयोजनीय समानां गानं भवति।

4. उफह्यगानं मन्यते, रहस्यगानस्य सर्वसाधरणसमक्षे निषिद्धं वर्तते।

सामान्यतया सामगानस्य पंचविभागास्सन्ति -

1. प्रस्तावः - मंत्रास्य प्रारम्भिकभागोऽयं हुँ इति शब्दात्प्रारभ्यते प्रस्तोतास्य गानं करोति।

2. उद्गीथः - साम्नः प्रधानो ऋत्विगुद्गाता गायति ऊँ इत्यारभते।

3. प्रतीहारः - अर्थात् संकलनकर्ता प्रतिहर्तानामको ऋत्विगेनं गायति अस्य यदा कदा खण्डद्वयमपि भवति।

4. उपद्रवः - यमुद्गाता गायति तदेवोपद्रवः।

5. निध्नः - प्रस्तोता, उद्गाता, प्रतिहर्ता त्रयोहि मिलित्वास्य गानं कुर्वन्ति।

अस्मिन् मंत्रो यस्य गानं भविष्यति तस्य पञ्चाङ्गानि साम्प्रतं दीयन्ते।

ऊँ अग्न आयाहिवीतये गृणानो हव्यदातये।
निहोता सत्सि बर्हिषि।।

1. प्रस्तावः - प्रस्तोता हुँ ओग्नाइ प्रारभ्यते।

2. उद्गीथः - ऊँ आयाहिवीतये गृणातो हव्यदातये।

3. प्रतिहारः - निहोता सत्सि बर्हिषि ऊँ

4. उपद्रव निहोता सत्सिब

5. निध्न र्हिषि ऊँ

येषामुपरि सामगानं भवति ते 'सामयोनि' मन्त्राः कथ्यन्ते, क्रान्तदर्शिभिः पूज्यपादैरनैकै ऋषिभिः सहस्रशः प्रदर्शितान्यनेक विधानि गानानि प्रदर्शितानि, तानि तु तेषामेव नामभिरदानीं पर्यन्तं व्यवह्रियन्ते, यथा गौतमस्य पर्कं कश्यपस्य बर्हिषमित्यादीनि।

ऋग्वेदमन्त्राः

अग्न आ याहि वीतये गृणानां हव्यदातये। नि होता सत्सि बर्हिषि।[28]

सामवेदमन्त्राः (सामयोनिःद्)

अग्न आ याहि वीतये गृणानां हव्यदातये। निहोता सत्सि बर्हिषि।।[29]

अस्य गानानि

(1) गौतमस्य पर्कम्

ओग्नाई। आयाहीS3। वोश्तोयाS2ई। तोयाS2इ। गृणानो ह।

व्यदातोयाS2ई। तोयाS2इ।

नाइ होतासाS2 3। त्साS2 इ। वाS2 3 4 ओहोवा। हीS234पी।।1।।

(2) कश्यपस्य बार्हिषम्

अग्न आयाही वी। तया इ। गृणानो हव्यदाताS23 याइ। नि होता सत्सि

वर्हाS23 इषी। वर्हाS2इषाS234 औहोवा। वहीS3षीS2345।।

(3) गौतमस्य पर्कम्

अग्न आयाहि। वा S 5 इतयाइ। गृणानो हव्यदाS1ताS3ये। नि होता 2 3 4 सा। त्साS 2 3 4 इवाS3। हाS234 इषोS6हा इ।।

यज्ञेषु उद्गातृभिः वीणामृदंगस्वरतालैः सप्तस्वरत्रिभिग्रामैः श्रुतिमूर्छनातानसहितं यदा गीयते तदत्यन्तं हृदयाह्लादकममौलिकिकानन्दप्रदं च भवति। वैदिककालाद् अद्यावधिभारतीयैः मनीषिवर्यैः ऋषिभिः प्रचारितसप्तस्वरेभ्योSधिको न कश्चिदन्यः स्वरो विकासितो न च विकासयितुं शक्यते, अधुना शास्त्रीयसंगीतप्रभावेण रोगनिवारणमेव नहि प्रत्युत वृक्षवनस्पत्यादिष्वनुकूलः प्रभावोत्पादयितुं शक्यते, यथा दीपक, मल्हार, वसन्तादि रागैर्दीपनं वर्षणं कार्यते, शिशिराहताः वृक्षाः पुष्पिताः पल्लविताः कर्तुं शक्यन्ते तर्हि सामगानेन इतोSप्यधिकः प्रभावः भवितुं शक्यते। सुप्रसिद्ध शर्मण्यदेशीय विद्वान् बेवरः [30] भारतीयसाहित्ये लिखति यद् हिन्दूनां सप्तस्वराणां स, रे, ग, म, प, ध्, नि एषां अनुकृतिः ईरानीवासिभिः कृता तथा च दो, रे, मि, फ, सो, ल, सि, इत्येतेषु परिवर्तितम्। फारसीतः आदाय 'गिडो' नाम्ना आँग्लेन दो, रे, मि, फ, सोल, लो, टी इत्यादिषु परिवर्तितमेवमेव 'फाँसीसी'नाम् 'ग्रामः' आंग्लानां 'गेमट'शब्दा अपि संस्कृतस्य 'ग्रामः' तथा च प्राकृतस्य 'गम' इत्यस्यैव रूपान्तरणं विद्यते। अतो निर्विवादेन वक्तुं क्षमा यद् विश्वस्मिन् संगीतस्याद्यः प्रचारको 'गुरु'र्वा वैदिक ऋषिरेव आसीत्।

0-0-0

[1] **मनु.** 2/7

[2] **मनु.** 12/76

[3] **वृषामतीनां विचक्षणः सोमो अर्ाििं प्रतरीतोषसां दिवः। प्राण्य सिन्ध्ूनां कलशा§ अचिक्रददिन्द्रस्य हाद्र्याविशन्मनीषिभिः।।**21**।।**

[4] **पावमानीशोध्पत्रिका, डा. सोमदेव शतांसु।**

[5] **अमृता मानदा पूषा पुष्टिस्तुष्टीरतिध्ृतिः। शशिनी चन्द्रिकाकान्तिज्र्योत्स्नाश्रीः पीतिरघõदा।।**1**।। पूषणा चाथपूर्णाः स्युः कलाशचन्द्रस्य षोडश इति। अमरको.** 1/3/15 **मणिप्रभाव्याख्या**

[6] **प्रकलविद्वणिग्भवति कलाश्च वेद प्रकलाश्च निरु.** 6/6 **कलशः कस्मात्। कला अस्मि×छेरेत मात्राः। कलिश्च कलाश्च किरतेः विकीर्णमात्राः।**

[7] **निघण्टुः** 3/4 **खण्डे**

[8] **ऋ. मा अहं मृण्मथे गृहं गमम्'** 7.89.1

[9] **ऋ.** 7.88.5

[10] **ऋ.** 3.1.18, 3.25.4, 4.13.1, 5.76.4

[11] **अथर्व.** 7.17.3

[12] **इहैव ध्रुवा प्रतितिष्ठशाले। अथर्व.** 3/12/2

[13] **अथर्व.** 9.3.21

[14] **हविर्धनमग्निशाले पत्नीनां सदनं सदः। सदोदेवानामसि देवि शाले।। अथर्व.** 9.3.7

[15] **ऋ..** 2.20. 8, 2.166.8, 7.15.24

[16] **गीता** 10.42

[17] **तै. ब्रा.** 3.7

[18] **छा. उ.** 1.3.4

[19] **छा. उ.** 1.6.1

[20] **अथर्व.** 14.2.71, **ऐ. ब्रा.** 8.27, **बृ. उ.** 6.4.20

[21] **बृ. उ.** 1.3.22

[22] **जै. सू.** 2.1-36

[23] **छान्दो. उ.** 1.8.4

[24] **बृ. उ.** 1.3.25

[25] **ना. शि.** 4/1

[26] **पि. सू.** 3.64

[27] **गान्ध्ववेदे ये प्रोक्ता सप्त षड्जादयः स्वराः। त एव वेदे विज्ञेयास्त्राय उच्चादयः स्वराः।।**

**उच्चैनिषादगान्धरौ नीचावृषभध्ैवतौ। शेषास्तु स्वरिता ज्ञेयाः षड्जमध्यमप×चमाः।। या. शि.**6,7

[28] **ऋ.** 6.16.10

[29] **साम.** 1.1.1.1

[30] The Hindu scale, sa, re, ga, ma, pa, dha, ni, has been borrowed also by the Persians, where we find it in the form do, re, me, fa, so, la, ci, It came to the west and was introduced by Guido or Arezyo in Europe in the form do, re, mi, fa, sol, lo, ti. I have, moreover, hazarded the comjecture that even the 'gamma' of Guido (French gramma, English Gama Gumut), goes back on the Sanskrit Gramma and Prakrit Gama and is thus a direct testimony

of the Indian origin of our European Scale of Seven of seven notes. (page 297) **पावमानी शोधपत्रिका, वैदिक शोध संस्थान,टीकरी, मेरठ**